National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(63): 246-248
© 2025 NJHSR
www.sanskritarticle.com

**अञ्जलीपालः**
साहित्यविभागः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
श्रीसदाशिवपरिसरः, पुरी, ओडिशा

.

**Correspondence:**
**अञ्जलीपालः**
साहित्यविभागः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
श्रीसदाशिवपरिसरः, पुरी, ओडिशा

# वैयाकरणसिद्धान्तकौमुद्यां लृङ् लकारस्य प्रयोगविश्लेषणम्

**अञ्जलीपालः**

कलयति सर्वमिति 'ण्यन्तात्पचाद्यच्' "नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः" (३/१/१३४) सूत्रेण कल्यते इति कर्मणि घञ् "अकर्त्तरि च कारके संज्ञायाम् (३/३/१९) इति सूत्रेण च 'कलसंख्याने शब्दे च' (भ्वा.आ.से.) धातोः काल इति व्युत्पाद्यते। कपिलेन सांख्ये गौतमेन न्याये कालविषये किञ्चिदनुक्तमपि काणादा द्रव्यान्तर्गतं कालं मन्यन्ते "अतीतादिव्यवहारहेतुः काल" इति अन्नभट्टोक्तेः। पाशुपतदर्शनानुसारेण षट्त्रिंशत्तत्त्वेष्वेकतमं तत्त्वं काल उरीकृतः। वेदान्तिनस्तु कालमाविद्यकं मन्यन्ते। 'अव्यक्तादभवत्काल' इति कूर्मपुराणेऽपि (२.३.९)। अन्यत्र "कलनात्सर्वभूतानां कालोहि भगवान् स्वय' मिति पौराणिका जगुः। अनाद्यनन्ताखण्डः सन्नपि कालो व्यावहारिकदृष्ट्या, कलाकाष्ठादिक्रमेणाकल्पं विभज्यते। लोके स्थूलतया भूतभवद्भेदेन त्रिधा विभज्यमानोऽपि सूक्ष्मतयानेकधा विभज्यते। पाणिनिस्तदनुयायिनोऽन्येऽपि लडादीन्दशलकारान्मन्वते। तत्र लुङित्युच्यमाने दशमलकारः परिशील्यते। प्रयोगं वीक्ष्य पाणिनिना लडादिभिर्दशभिर्लकारैर्विभक्ता क्रिया, उताहो तत्पूर्ववर्त्तिभिरिति विमर्शविषयः। पूर्ववर्त्तिनां व्याकरणानामनुपलम्भाद्भगवान् पाणिनिरेव प्रथमो विभक्ता संज्ञाविधाता चेति प्रतिपद्यते, यथा भनद्यादीनाम्। सामान्यतया भूतभवद्भविष्यद्भेदेन कालस्त्रिधा। तत्र भवति (वर्त्तमाने) लट्, भूतेलुङ्, भविष्यति गृडिति त्रयोलकारा भवन्ति। अद्यतनानद्यतनत्वेन भूतं भविष्यतं द्विधा विभज्य अनद्यतनभूते लङ् अनद्यतने भविष्यति लुडिति लकारद्वयम्। केषांचिन्महान् भ्रमो लक्ष्यते यत्ते अद्यतनातीत एव लुविषय इति मन्यन्ते। यद्यप्याकल्पारम्भं वचनप्रयोगपूर्ववर्त्तित्वमस्य विषयः। लोलिङौ च (विध्याशीर्भेदेन) भविष्यतमेव बोधयतः। आयुष्मान् भव भवेः भूया वेति प्रयोगात् अव्यवस्थितप्रयोगं केवलं वेदेष्वेवालक्ष्य लेट् छन्दोमात्रगोचरो न लोके इति स्वीकृतम्।

परं लृप्रयोगः कदा कथं कुत्र क्रियते इति विषये समस्या जायते। पाणिनिना विषयेऽस्मिन् "लिनिमित्ते लृङ् क्रियापितत्तौ (३.३.१३९) "भूते च" (३.३.१४० ) इति सूत्रद्वयमाम्नातम्। अत्र काशिकाकारो ब्रूते "भाविष्यतीत्युनवर्त्तते। हेतुहेतुमतोर्लिङित्येवमादिकं लिङो निमित्तं, तत्र लिनिमित्ते भविष्यति काले लृङ्प्रत्ययो भवति क्रियातिपत्तौ सत्याम्। कुताश्चिद्वैगुण्यादभिनिर्वृत्तिः क्रियायाः क्रियातिपत्तिः। दक्षिणेन चेदायास्यन्न शकटं पर्य्याभविष्यत्। यदि कमलकमाह्लास्यन्न शकटं पर्य्यभविष्यत्। अभोक्ष्यत भवान् घृतेन यदि सत्समीपमागमिष्यत् भविष्यत्कालविषयमेतद्वचनम्। भविष्यदपर्य्याभवनञ्च हेतुमत् तत्र हेतुभूतञ्च कमलकाह्वानम्। लिङ्गि लिङ्गे बद्ध्वा तदतिपत्तिञ्च प्रमाणान्तरादवगम्य वक्ता वाक्यं प्रयुङ्क्ते। यदि कमलकमाह्वस्यन्न शकटं पर्य्यभविष्यदिति; हेतुहेतुमतोराह्नानापर्य्याभवनयोर्भविष्यत्कालविषययोरतिपत्तिरितो वाक्यादवगम्यते। (काशिका) पतञ्जलिरपीत्थमेवावोचन्महाभाष्ये। भट्टोजीदीक्षितेनापि सिद्धान्तकौमुद्यां वृत्तावेवमेव व्यलेखि "भविष्यत्ये वा सुवृष्टिश्चेदभविष्यत्तदा सुभिक्षमभविष्यत्" अतिपत्तिरनिष्पत्तिः। लिङ्निमित्ते लृङ् स्यात् भूते भविष्यति च क्रियातिपत्तौ। अद्यतनानद्यतनसाधारणं भूतसामान्यमिह ज्ञेयम्।

सरलावृत्तौ गुरुप्रसादशास्त्रिणा शब्दान्तरैरेव भट्टोजीमतमुद्धृतम्। तथाहि हेतुहेतुमद्भावादौ लिनिमित्ते भविष्यति काले लृङ् स्यात्क्रियातिपत्तौ गम्यमानायाम्। द्वितीयसूत्रार्थमाह लिनिमित्ते लृङ् स्याद्भूते भविष्यति च। कौण्डभट्टोऽपि-

**ह्योभूते प्रेरणादौ च भूतमात्रे लङादयः।**
**सत्यां क्रियातिपत्तौ च भूते भविनि लृङ् स्मृतः॥**

(वैयाकरणभूषणसारः)

कारिकां विलिख्य विवृणोति 'लृङ्माह सत्यामिति। क्रियाया अतिपत्तिरनिष्पत्तिस्तस्यां गम्यमानायां भूते भाविनि हेतुहेतुमद्भावे सति लृङित्यर्थः। 'लिनिमित्ते लृङ् क्रियातिपत्तौ' इति सूत्रात्, लिङो निमित्तं हेतुहेतुमद्भावादि। यथा 'सुवृष्टिश्चेदभविष्यत्सुभिक्षमभविष्यत् वह्निश्चेत्प्राज्वलिष्यद्, ओदेनमपक्ष्यत्। इत्यादौ नागेशभट्टमहोदय-स्त्वाह "लुङादेशस्य तु क्रियातिपत्तौ गम्यमानायां हेतुहेतुमद्भावे च गम्यमाने भूतत्वं भविष्यत्त्वञ्चार्थः। आपादना तु गम्यमाना। भूते एधश्चेदलप्स्यत ओदनमपक्ष्यत् "लुङो भविष्यत्त्वं हेतुहेतुमद्भा-वाऽतिपत्तिश्चार्थः। लिङ्निमित्ते लृङ् क्रियातिपत्ताविति पाणिनिसूत्रस्वरसात्....क्रियाया अतिप्लुतरक्रमेण पतनं सम्भावनं, यद्देशे यत्काले वा यत् क्रियायाः सम्भवस्तदन्यस्मिन् देशे काले वा तत्सम्भावनं प्रसञ्जनमिति यावत्। तच्च सम्भावनं बाधानवतारे तत्कोटिकसंशयः, बाधावतारे चाहार्यज्ञानं तत्र धात्वर्थः प्रकारतया, प्रथमान्तार्थश्च विशेष्यतया अन्वेति। यथा यदि वर्षसहस्रमजीविष्यं तदा पुत्रशतमजनयिष्यम्।....... एवम्भूतेऽपि उक्तरूपार्थे लृङ्, यथा यदि शिलाः कोमला अभविष्यंस्तदा क्रोष्टुभिरभक्षयिष्यन्त। अत्र यदि शब्दस्य असत्त्वं कालविशेषश्चार्थः लुश्चातीतत्वं हेतुहेतुमत्त्वं प्रसञ्जनं चार्थः।...... हेतुहेतुमद्भावो यथायथमतीतत्वमनागतत्वञ्च लुङर्थः।

तथा क्रमदीश्वराचार्येण संक्षिप्तसारे सूत्रितं 'लङ् लृङ्हेतौ कृत्यानिष्पत्तौ भूते च" (सू ८४२) वृत्तिर्विहिता जुमरनन्दिना लङेव लृङ्संज्ञः सन् लिङ्हेतौ भाविनि भूते च क्रियाया अनिष्पत्तौ गम्यमानायां भवति। तत्र स्यङ्च। यदि मत्समीपमागमिष्यद्, तदा भवान् धृतेनाभोक्षतेति। हेतुहेतुमतोर्मत्समीपागमनघृतभोजनयोर-निष्पत्तिरत्रवाक्याद्गम्यते। यद्यन्नार्थी पथिकोऽत्र दृष्टोऽभविष्यद्, उताभोक्षत, अप्यभोक्षत। अन्येन पथा स गतः न भुक्तवान्।

सर्ववर्मविरचिते कलापव्याकरणेऽपि तथोक्तं 'भूतकरणवत्याश्च' (सू १४) भूतकालः करणं तद्विद्यते यासामिति पारिशेष्याद्दह्यस्तन्यद्य-तनीक्रियातिपत्तय एव रूढाः। एता भूतकरणवत्यस्तिस्रो विभक्तयोऽतीते काले भवन्ति। अकरोत् अकार्षीत्, अकरिष्यत्, "भविष्यति भविष्यन्त्याशी श्वस्तन्य: (सू १५) भविष्यत्काले भविष्यन्त्याशीः श्वस्तन्यस्तिस्रो विभक्तयो भवन्ति। कटं करष्यिति। शत्रुं वध्यात्। ओदनं भोक्ता 'भूते च' (वृत्ति:) उताप्योः समर्थयोरित्यादि लिङ्निमित्ते भूतेऽर्थे लृङ्स्यात् क्रियाया अनिष्पत्तौ। यद्यहमैषिष्यमुताभोक्ष्ये, अप्यभोक्ष्ये। न भुक्तवान्।

जैनेन्द्रव्याकरणे पाणिनिसूत्रमीषत्परवर्त्य लिखितमस्ति। तथाहि 'लिङ्हेतौ लृङ् क्रियातिवृत्तौ (२.३.११५) वर्त्स्यतीति वर्त्तते। लिहेतौ वर्त्स्यति काले लृङ् भवति क्रियाया अवृत्तौ सत्याम्। "'हेतुफलयोर्लिङ् ( २.३.१३२) इत्येवमादि लिङ्निमित्तं वक्ष्यति। अतिथींश्चेदलप्स्यत भृशमन्नमदास्यत्। अत्रान्नदानं फलं तद्धेतुभूतोऽतिथिलाभः तदनभिनिर्वृत्तिं प्रमाणादवगम्येदं वाक्यं प्रयुक्तम्। एवमुपाध्यायं चेदुपसिस्यत शास्त्रान्तमगमिष्यत्। अभोक्ष्यत भवान् दध्ना यदि मत्समीपे आसिष्यत। इह दक्षिणेन चेदयास्यत् न पर्य्याभविष्यदिति यानमनिष्पन्नमिति कथमवृत्तिः क्रियायाः। एवं तर्हि प्रत्यासत्तेर्हेतुभूतायाः क्रियाया अवृत्ताविति द्रष्टव्यम्। क्रियाया अवृत्तावपि शक्तिरूपेण क्रियामध्यारोप्य कर्तृत्वेनाभिसम्बन्धः क्रियते। यथा भूतभविष्यत्कालविषयाया: कर्तृत्वेनाभिसम्बन्धः। 'भूते' (२.३.११६) भूते च काले लिहेतौ क्रियाया अवृत्तौ सत्यां लृङ् भवति। दृष्टोमया भवत्पुत्रोऽन्नार्थी चङ्क्रम्यमाणः। तातिर्थी यदि तेन दृष्टोऽभविष्यत् उताऽभोक्ष्यत, अप्यमोक्ष्यत, अन्येन पथा स गतः। नापि भुक्तवान्। इदं सर्वं प्रतिवचनम् (जैनेन्द्र महावृत्तिः)।

एवत्सर्वपर्य्यालोचनयेदमेव प्रतिपद्यते यद्धेतुहेतुमतोः सर्वदापूर्वपर-वर्त्तित्वे सत्यपि भूतेकाले चेदुभयोरवस्थितिरतिपत्तिश्च तत्र, भूते हेतुक्रियायास्तद्भित्रे (अर्थाद्वर्त्तमाने भविष्यति वा) काले हेतुमत्क्रियाया अवस्थितिश्च तत्रापि लृङ् स्यात्। यथा पुरीं चेदगमिष्यं महाप्रसादमानेष्यम्। नागममतो नानैषम्। द्वितीयस्योदाहरणं यथा यदि स राजनीतौ प्रावेक्ष्यत्तदावश्यमधुना मन्त्र्यभविष्यत् अथवा भविष्यति मन्त्र्यभविष्यत्। यद्युभयोर्हेतुमतोर्भविष्यत्यवस्थितिस्तत्र विधिलिङ् लृड्वा। यथा शिवं नमेच्चेत् सुखं प्राप्नुयात्, शिवं नंस्यति चेत् सुखं प्राप्स्यति। आंग्ल्यामीदृशे स्थले 'would' प्रयुज्यते। If he would come hereI would go there. अत्रासौ चेदागमिष्य-दहंतत्रागमिष्यम्। असौ नागमत् अहं नागमम्।

भगवता पाणिनिना यन्न सूत्रितं वार्त्तिककारेण कात्यायनेन, पतञ्जलिना च किमपि विषयेऽस्मिन्नोक्तं भट्टोजिना यन्न लिखितम्, नागेशभट्टेन यन्न विचारितं विद्वद्देशीयस्यार्वाचीनस्यास्य प्रलपनमेतदित्युपेक्षाबुद्धिमपहाय निरपेक्षतया सुधीभिर्विचारणीयम्। पाणिनिना सूत्रितम् 'शश्छोऽटि' (८/४/६३) 'तत् श्लोकेन इत्यत्रास्य प्रसक्तिर्न भवतीति 'छत्वममीतिवाच्यम्' (२८) इति वार्त्तिकं कथं प्रणीतम् ? अपि च यदि भूते भविष्यति चोभयोः कालयोरस्य प्रयोगः समीचीन इत्याग्रहस्तर्हि यदुदाहरणं' सुवृष्टिश्चेदभविष्यत्तदा सुभिक्षमभविष्य दिति वाक्ये कथमवधार्य्येत भूतं भविष्यतं वाभिप्रेत्य वाक्यमिदं प्रयुक्तम् ? विनिगमनाविरहात्।

अतो बालमनोरमायां वासुदेवेन यल्लिखितम् अत्र लिनिमित्तसत्त्वात् भविष्यति तु क्रियातिपत्तौ भूते च लृङ्।...... क्रियातिपत्तौ तु भविष्यति नित्यं लृङ् भूते चेत्यधिकारः सम्पूर्णः इति यच्च रामनारायणदत्तपाण्डेयेन लघुसिद्धान्तकौमुदीटिप्पण्यां क्रियाया

अनिष्पत्तौ लिनिमित्तसद्भावे भविष्यत्काले लृप्रयोगः, विध्याद्यर्थस्य तत्रैव सम्भवात् इति च तच्चिन्त्यम्।

अतो भूत एव लृङ् न भविष्यतीति नेदं मयोहितं न वा मामकीनेयमुपज्ञा। 'भूतकरणवत्याश्चे' तिसूत्रे (१४) कलापे सुस्पष्टमुक्तत्वात् वेदभाष्यपुराणादिषु तथैव प्रयोगदर्शनाच्च। तथाहि छान्दोग्ये वर्णितास्त्याख्यायिका। कुरुदेशो यदा दुर्भिक्षपीडित आसीत् तदानीं क्षुधार्त्त उषस्तिरिभ्यग्रामवास्तव्यात्कुल्माषं खादतो हस्तीपकादुच्छिष्टमपि भिक्षित्वाभुंक्त। यदा हस्तीपकस्तं जलं ग्रहीतुमाह तदानीमवोचदसौ- 'उच्छिष्टमेतन्न मे ग्राह्यम्। पुनर्हस्तीपक आह तत्कुल्माषं किं नोच्छिष्टम् ? तदानीं स न वा अजीविष्यमिमानखादन्निति होवाच', अत्र भूतकाल एव लृङ् प्रयुक्तम्। यदि कश्चिच्छङ्केत कुतोनात्र भविष्यत्प्रयोग इति, तर्हि लृडेवाभविष्यत्। यथा तान् ह स ऋषिरुवाच- 'भूय एव तपसा ब्रह्मचर्येण श्रद्धया संवत्सरं संवत्स्यथ। यथा कामं प्रश्नान् पृच्छथ, यदि ज्ञिस्यामः सर्वं ह वा वक्ष्याम' इति।

गुरुकुलात्प्रत्यावृत्तं ज्ञानदृप्तं पुत्रं श्वेतकेतुं वीक्ष्य पितारुणिः प्राह- 'यद्विज्ञानेन सर्वं ज्ञायते तज्ज्ञातं त्वया' तदासौ नेत्यवोचत्। स तदावादीत् मन्ये मम गुरवोऽपि न जानन्ति 'यद्धयेतदवेदिष्यन् कथं मे नावक्ष्यन्' (छा ६/१/४) एवमपि यद्वै वाङ्नाभविष्यन्न धर्मो नाधर्मो व्यज्ञापिष्यत्। (छा ७/२/१)।

आचार्यशङ्करेणापि भूतकालिकीं क्रियातिपत्तिमुद्दिश्यैव भाष्ये लृङ् प्रयुक्तम्। तथा हि 'यदि तार्किकसमय इव वेदान्तेष्वपि भिन्नकारणावगतिरभविष्यत् क्वाचिच्चेतनं ब्रह्म जगतः कारणं क्वचिदचेतनं प्रधानम् क्वचिदन्यदेवेति, ततः कदाचित्प्रधानकारण-वादानुरोधेनापीक्षत्यादिश्रवणमकल्पयिष्यत्। न त्वेवमस्ति। (ब्र.सू. १/१/१० शा.भा.) वात्स्यायनोऽपि भाष्योपक्रमे 'यथा दर्शकेन दृश्येन दीपे गृह्यमाणे तदिव यन्न गृह्यते तन्नास्ति, यद्यभविष्यदिदमिव व्यज्ञास्यत, विज्ञानाभावान्नास्तीति।

यदहं तं समाज्ञास्यमीश्वरोऽसौ निरीश्वरः।
तदा कथमदास्यँ त्वां तस्मै मायास्वरूपिणे। स्क.पु. काशीखण्डे पूर्वार्द्ध ८८/ ७२

दक्षः सतीं भाषते शिवमुद्दिश्य। शिवाय सत्यादानं दक्षेण पूर्वमेव कृतमासीत्।

यज्ञे अपमानयितुं न न्यमन्त्रयदिति भूते लृङत्र।

किंवाकरिष्यन् भववर्त्तिनो जना नानाघसङ्घाभिभवाच्च दुःखिताः।
नचागमिष्यद्धवती भुवश्चेत्पुण्योदके गौतमि शम्भुकान्ते।
(ब्रह्मपु. ११९/९)

नर्मदां संबोध्योक्तिरियमोषधीनाम्।

कुशोयद्यभविष्यत्स रणे वीरशिरोमणिः।
अमोचयिष्यदधुना भवन्तं भूपपार्श्वतः।।
(पद्मपु.पातालखण्डे ६/३/१५)

शत्रुघ्नेन लवं मूर्च्छितं विज्ञाय सीताया विलापः।

यदि ह्यहेहिष्यत बोधयन् जनं खुरैः क्षितौ वाप्यकरिष्यत् घ्वनिम्।
हनुस्वनं वाजनयिष्यदुत्तमं न चाभविष्यन्मम दुःखमीदृशम्।
(बुद्धचरितं ८/४१)

गौतमं वने परित्यज्य प्रत्यावृत्तमश्वं कन्थकमालक्ष्य यशोधाराया विलापः।

कालिदासोऽपि 'परस्परेण स्पृहणीयशोभं न चेदिदं द्वन्द्वमयोजयिष्यत्।
अस्मिन् द्वये रूपविदानयत्नः पत्युः प्रजानां विफलोऽभविष्यत्।
(रघुवंशे ७/१४)

भट्टिना रावणवधकाव्यस्य एकविंशे सर्गे विहितो लृङ्खला-सोऽवश्यमेव लक्षणीयो विपश्चिद्भिः। स्थालीपुलाकन्यायेनैकमेव पद्यमुद्ध्रियते-

**यावज्जीवमशेचिष्यो नाहास्यश्चेदिदं तमः।**
**भानुरप्यपतिष्यत्क्ष्मामक्षोभिष्यत् चेदियम्।। (२११६)**

सीतायाः सतीत्वपरीक्षावसरे अग्निः रामं संबोध्य वक्ति। 'यदि अस्या विषये तव अज्ञानं अस्थास्यत् तर्हि आजीवनं दुःखमन्वभविष्यः। अज्ञानन्तु तिरोहितमित्यादि। अत्र टीकाकृतः केचन भविष्यत्कालिक-मर्थापितवन्तः। तच्चिन्त्यम्।

एवमेव उपनिषद्भाष्यपुराणकाव्येषु प्रयोगाणां परिशीलनेन कलापो-क्त्या च हेतुक्रियाया भूतत्व एव लृङ् विषयो न भविष्यतीति निष्पन्नम्।

**पित्रोः सुपुत्रोऽस्ति यदीह कशिच्छुश्रूषया तोषितवान् गुरून् वा।**
**कृतश्रमो वा यदि वेदवेदे मानेन लेखं मम खण्डयेत्तत्॥**

**सहायकग्रन्थसूची**


१. **अष्टाधयायी सूत्रपाठः** सरलावृत्तियुतः भार्गवपुस्तकालयः, गायघाट काशी १९३७ ख्री.
२. **सिद्धान्तकौमुदी** तत्त्वबोधिनीयुता श्रीवेङ्कटेश्वर प्रेस, मुम्बयी
३. **सिद्धान्तकौमुदी** बालमनोरमाटीकायुता, चैखम्बा संस्कृत संस्थान, वाराणसी
४.**लघुसिद्धान्तकौमुदी,** गीताप्रेस्, गोरखपुर
५. **काशिका**
६. **वैयाकरणभूषणसारः** चौखम्बा संस्कृत भारती प्रकाशन, वाराणसी २००१ ख्री.
७. **परमलघुमञ्जूषा,** कृष्णदास अकादमी वाराणसी, १९९७ शकाब्द
८. **कातन्त्रव्याकरणम्,** 'रणजित् सिंह' सम्पादितम् भारतीयविद्या-प्रकाशन, वाराणसी १९९४ ख्री.
९. **जैनेन्द्रव्याकरणम्,** महावृत्तियुतम्, भारतीयज्ञानपीठ, काशी १९५६ ख्री.।
१०. **लकरार्थनिर्णयः,** भवानन्दसिद्धान्तवागीशकृतः, शिवनारायण-दासलेन, कलकत्ता १३३७ बङ्गाब्दः।